# जीवत्वेश्वरत्वे राधेयत्ववत्

डा. टी. जी. श्रीजित्

अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभेदान् सम्प्राप्य शौरिपदोद्गता।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा।।

वेदान्तैकवेद्यब्रह्ममात्रस्य सत्यतामङ्गीकुर्वता वेदान्तिना परमप्रमाणतया श्रुतिरेवाभ्युपगता। सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम् (छा. उ. ६।२।१) इत्यादिभिः श्रुतिभिः ब्रह्मण एव सत्वं सत्यत्वञ्च बोध्येते। एवमपरत्रापि श्रुतिरेव जीवेश्वरयोर्विभागं दर्शयति। तथा च भेदबोधिकाः श्रुतयः -

१. कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।

२. जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति।

३. यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्नो बहुधैकोऽनुगच्छन्।

इत्थं या वेदान्तिनां प्रबलप्रमाणभूता सैव श्रुतिः ब्रह्मण एकस्य सत्यत्वं बोधयत्येकत्र, अपरत्र तु तद्भिन्नत्वेन जीवेश्वराविति भेदभावं प्रदर्शयति च। एवञ्च एकत्वं यया श्रुत्या सिद्ध्यते तयैवानेकत्वमपीति परस्परविरोधः च समभवत्। एतादृशविरोधपरिहारमुद्दिश्य वेदान्तशास्त्रव्याख्यासरणिषु प्रवृत्ताः केचन वादाः प्रचलन्ति। ते च-

१. प्रतिबिम्बवादः।

२. अवच्छेदवादः।

३. आभासवादः। इति विश्रुताः।

१. प्रतिबिम्बवादः-वस्तुतः ब्रह्म एकमेव सत्यं, तर्हि जीवेश्वरौ कौ इति प्रश्ने उच्यते ब्रह्मणः प्रतिबिम्बावुभाविति। एवञ्च ब्रह्म बिम्बस्थानीयं जीवेश्वरौ प्रतिबिम्बस्थानीयौ च। 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते' (वि. पु. ६।७।९६) इति स्मृत्या एकस्यैवाज्ञानस्योपाधिनिमित्तोऽयं जीवेश्वरयोः प्रतिबिम्बभाव इति ज्ञायते।

यथा पुरुषस्यैकस्य मुखं दर्पणे प्रतिबिम्बिते, ततः मम मुखं दर्पणेऽस्तीति भेदबुद्धिं परिकल्प्य ग्रीवास्थयथार्थमुखादन्यस्य दर्पणगतमुखस्य भेदव्यवहारः, तथा सत्यभूतस्य ब्रह्मणः प्रतिबिम्बम् अज्ञाने प्रकल्प्य जीवेश्वराविति भेदव्यवहारः।

एवञ्च प्रतिबिम्बवादानुसारेण अनुभूयमानः श्रुत्युक्तः भेदः अज्ञानोपाधिगत एव, न सत्यः। विनष्टे चाज्ञानोपाधौ भेदोऽपि विनश्यति, यथा दर्पणेऽपगते प्रतिबिम्बो नश्यति तद्वत्।

२. अवच्छेदवादः-अयमपि वादः भिन्नसरण्या जीवेश्वरयोर्भेदः उपाधिगत एव, न पारमार्थिकेति सम्बोध्य आत्मनो एकस्यैव सत्यत्वं व्यवस्थापयति श्रुतिविरोधं परिहरति च। सर्वत्र विद्यमानचैतन्यमेव सर्वेषामन्तःकरणेऽपि विद्यते, तथापि तच्चैतन्यं परिच्छिन्नमेव। तथा च अनवच्छिन्नं शुद्धञ्च यच्चैतन्यं तदन्तःकरणेनावच्छिद्यते, परिच्छिद्यते-परिमितीक्रियते इत्यर्थः। एवञ्चान्तःकरणावच्छिन्नं चैतन्यं जीवः, तदनवच्छिन्नं चैतन्यम् ईश्वरश्च। अथवा अविद्यावच्छिन्नः ईश्वरः।

यथा कृत्स्न आकाशः जलेनावच्छिद्य जलाकाश इति, मेघेनावच्छिद्य मेघाकाश इति व्यवहारः तथान्तःकरणाद्यवच्छेदकभेदेन जीवेश्वराविति भेदव्यवहारः। अवच्छेदकोपाधिनाशे सति अनवच्छिन्नशुद्ध चैतन्यमात्रमवशिष्यते च।

३. आभासवादः-वादश्चायं पूर्वोक्तवादवत् न वैपुल्यमाप। अत एव जीवेश्वरभेदनिराकरणसरणौ प्रमुखस्थानं न भजते। वादस्यास्यायमभिप्रायः-जीवो ईश्वरो वा भवतु तदुभयमपि परमात्मन आभासमात्रं न सत्यमिति।

अविद्यया जीवभावः

सम्प्रति उपर्युक्तैर्वादैर्विना जीवेश्वरयोः उपाधिनिमित्तभेदं निराकृत्य ब्रह्मण एकत्वं व्यवस्थापयति। पक्षश्चैषः नैष्कर्म्यसिद्धिकाराणां सुरेश्वराचार्याणां भवति। जीवः ब्रह्मणः न प्रतिबिम्बः नाप्यवच्छिन्नश्च। एवं नाप्याभासभूतश्च। किं तर्हीत्यत्रोच्यते 'कौन्तेयस्य राधेयत्ववत् अविकृतस्यैव ब्रह्मण अविद्यया जीवभावः' इति। तथा च श्रुतिः-

ब्रह्मैव स्वाविद्यया संसरति स्वाविद्यया मुच्यते।

बृहदारण्यकश्रुतेरस्याः तात्पर्यमिदम्-ब्रह्मैव स्वस्याविद्यया भिन्नभिन्नान्तःकरणरूपेण परिणतया नानाजीवभावं प्राप्य संसरति। ततः स्वस्यैव विद्यया क्रमेण जीवभावं परित्यज्य ब्रह्मभावमवाप्नोति च।

यथा कर्णः राजकुले जनिमवाप्यान्यत्र व्याधकुले पालितः पोषितश्च। तत्र कुन्तीपुत्रोऽहमित्यविजिज्ञाय राधापुत्रोऽहमिति मत्वा जीवनं नीतवान्। अत एव निष्कृष्टकुलोत्पन्नोऽयं जनः मन्दभाग इति धिया दुःखमनुभूतवान्। यद्धेतुः कर्णस्य दुःखकारणीभूतः सः न वास्तविकः किन्तु अविद्याजनितः। यतश्च वस्तुगत्या कर्णः कौन्तेय एव न तु राधेयः। दुःखाभावहेतुभूतं कौन्तेयत्वं स्वतःसिद्धमप्यननुभूय दुःखजनकं राधेयत्वमविद्यावशादनुभवति।

एवं कौन्तेयत्वप्रयुक्ताच्छ्रेयोजीवनात् प्रच्युतः कर्णः राधेयत्वप्रयुक्तानुत्कृष्टजीवनमवाप्य नानाविधशापावमानादिलक्षणं बहुविधदुःखमाप्तवान्। भगवता श्रीकृष्णेन बोधितः कर्णः निजस्वरूपमवगम्यानन्दमवाप-

'कर्ण, कौन्तेयोऽसि त्वम्, न राधेयः' इति। ततः अविद्याकृतव्याधत्वराधेयत्वादिभावनिवृत्या तज्जनितनानाविधदुःखनिरासद्वारा कौन्तेयत्वस्मृतिप्रयुक्तं श्रेयः प्राप्यते च। तथा च वार्तिके-

राजसूनोः स्मृतिप्राप्तौ

व्याधभावो निवर्तते।

यथैवात्मनोऽज्ञस्य

तत्त्वमस्यादिवाक्यतः।। (सं। वा। २३३-२३४)

एवमेव ब्रह्मापि अनादिसिद्धया स्वस्यैवाविद्यया स्वीयं पारमार्थिकं रूपं विस्मृत्य जीवभावं गच्छति। ततः स्वतः सिद्धात् नित्यापरिमितानन्दस्वरूपात् दूरं याति, रागद्वेषादिसङ्कलिते जगति जीवो भूत्वा संसरति च। गच्छता कालेन येन केनचित् आत्मैकदृशा गुरुणा उपदिष्टः सन् संसारे मुह्यमानः जीवः मुक्ताविद्यो भूत्वा स्वस्वरूपं प्रतिजानाति। एवञ्च अविद्याजन्यजीवभावं परित्यज्य नित्यसिद्धनिरतिशयानन्दमनुभवति च।

एतदेवोक्तं वार्तिकेऽपि-

'आत्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः' इति। आदिशब्देन प्रज्ञानं ब्रह्म, अयमात्मा ब्रह्म इत्यादीनि ग्राह्यानि। स्वात्मरूपं विस्मृत्य यो अटति जीवः, स यदा 'न त्वं जीवोऽसि किन्तु तत्त्वमसि' इति उपदिश्यते गुरुणा तदा तत्त्वमस्यादिगुर्वाक्यजन्यसम्यग्ज्ञानेन अज्ञाननिवृत्तौ जीवभावाद्विमुच्यते। एवञ्च जीवत्वम् ईश्वरत्वं वा भवतु उभयमपि अविद्याकल्पितमेव। बिम्बप्रतिबिम्बमुखानुगतमुखस्वरूपत्वेनात्र परमात्मनो विवक्षा सर्वभेदव्युदासरूपलक्ष्यार्थावगाहिनी प्रसन्नगम्भीरामद्वैतसरणिं प्रोज्ज्वलन्ती महत्वपूर्णा विराजते।

१. छा. उ. - छान्दोग्योपनिषत्।

२. वि. पु. - विष्णुपुराणम्।

३. सं. वा. - सम्बन्धवार्तिकम्।

कौन्तेयः-कुन्त्याः अपत्यम्।

राधेयः - राधायाः अपत्यम्।

---